कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

३

मण्डिकल् रामशास्त्री

विद्वान् वि.गङ्गाधरभट्टः



KARNATAKA SAMSKRIT UNIVERSITY

विद्वान् वि. गङ्गाधरभट्टः

साम्प्रतिकसंस्कृतक्षेत्रे सुविख्यातनामा श्रेष्ठविद्वान् श्री गङ्गाधरभट्ट महोदयः लौकिकशास्त्रियवाङ्मये निपुणः, बहुश्रुतः, बहुशास्त्रकृतभूरिपरिश्रमः, अध्यापनसंशोधनकुशलश्च विराजते । आधुनिकप्राचीनविद्यासङ्गमः अयं स्वीयज्ञानवैशद्येन, चिन्तनसरण्या, निरूपणकौशलेन, विशिष्टबोधनक्रमेण, भाषाप्रौढिमातिशयेन, वाग्वैखर्या च अज्ञविज्ञसमुदाये प्रतिथः विद्वदग्रेसरः । नानाशास्त्रनिपुणः अपि नैयायिकेति विश्रुतः अयं संस्कृतक्षेत्रे विशिष्टस्थानमलङ्करोति ।

विद्वान् श्री गङ्गाधर वि. भट्टः श्रीमन्महाराजसंस्कृतमहापाठशालायां १९९७ वत्सरतः नवीनन्यायशास्त्रविभागे सहायकप्राध्यापकः भूत्वा कर्तव्यं निर्वहन्नस्ति । तत्रैव कलाशालायां प्राप्तविद्वत्पदवीकः १९७८तः श्रीशङ्करविलाससंस्कृतपाठशालायां मुख्याध्यापकत्वेन सप्तदशवर्षं यावत् कर्म निरवहत् । मैसूरुविश्वविद्यानिलयतः वाणिज्यपदवीं, तथा संस्कृते स्नातकोत्तरपदवीं च प्राप्तवान् । उत्तरकन्नडमण्डलस्य मणिकोप्पग्रमाभिजनः श्री विघ्नेश्वररेवतीदम्पत्योः पुत्रः प्राथमिकमाध्यमिकशिक्षणं स्वग्रामे प्राप्य, गोकर्णक्षेत्रे वेदान् अधीत्य, शास्त्रव्यासङ्गाय मैसूरुनगरस्थमहापाठशालां प्रविष्टः। एषः आयुर्वेदे , योगे, सनातनविज्ञाने, मनःशास्त्रे, अर्थशास्त्रे च कृतपरिश्रमः। स्वदेशीयाः विदेशीयाश्च जिज्ञासवः शास्त्रग्रन्थान् अध्येतुम् एनं अवलम्बन्ते । संस्कृतनाटकदिग्दर्शनेऽपि दक्षः अयं अनेकासु राष्ट्रियान्ताराष्ट्रियविचारगोष्ठिषु प्रौढं प्रबन्धं मण्डितवान् । दक्षिण एषिया अन्ताराष्ट्रिययोगसम्मेलने २००७ वत्सरे हाङ्काङ्गनगरे भारतस्य प्रतिनिधीभूय न्यायवैशेषिकसाङ्ख्यदर्शनानां योगदर्शने प्रभावः इति विषयमधिकृत्य न्यस्तोपन्यासः । Life Saving Yoga Session इति साक्ष्यचित्रे कृष्णमाचार्यपात्रं अभिनीतवान् । श्रीकृष्णमाचार्याणां योगमकरन्दनामकं कन्नडग्रन्थम् आङ्ग्लभाषया, कन्नडभाषायाः कथासरस्वतीग्रन्थं संस्कृतभाषया च अनूदितवान् । भारतसंस्कृतिप्रसारयोजनायाः सञ्चालकः अयं पञ्चदशवर्षेभ्यः प्रौढशालासु रामायणमहाभारतपरीक्षाकृत्यं निर्वहन्नस्ति । सुधर्मादिनपत्रिकायाः गौरवसम्पादकश्च वर्तते ।

2

कर्नाटकसारस्वतोपासकाः
परिचयग्रन्थमाला

मण्डिकल् रामशास्त्री

विद्वान् वि. गङ्गाधरभट्टः

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः, चामराजपेटे
बेङ्गळूरु–५६००१८

MANDIKAL RAMA SHASTRY

Author:

Vidvan Gangadhara Bhat

Sri Manmaharajasamskruta snatakottara adhyayana Kendra,
Mysore-580024

Published by

Prasaranga
Karnataka Samskrita University

Pampa Mahakavi Road,Chamarajpet

Bangalore - 560018

Ph.: 080 - 2670 1303, 26705387

Copies can be had from:

Samskrita Bharati

'Aksharam', 8th Cross, 2nd Stage,

Girinagar, Bangalore - 560085.

Phone: 080 - 26722576 / 26721052

First Impression: 2013

Paper used: 70GSM NS book print

Copies: 1000

Page: vi + 24 = 30

Price: Rs. 50/-

ಸ್ವಾನ್ ಪ್ರಿಂಟರ್ಸ್
www.svanprinters.com
☎ 080 - 2674 2233

कुलपतिवचनम्

जानन्त्येव हि तत्रभवन्तो भवन्तः प्राग् वर्षत्रयात् लब्धजन्मनः कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापनं,शोधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यास–ग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः ।

संस्कृतभाषा, तत्साहित्यं, शास्त्रसम्पत् च अगाधशेवधिः । खननेन अधिकं वर्धते । एतस्य निधेः सम्यगवगमनं यथा प्रधानं, तथा तस्य सम्यगुपयोगः अपि प्रधानतामाप्नोति इति वयं जानीमः । कर्नाटकसंस्कृतविश्वविद्यालयः शासनाङ्गं, शैक्षणिकाङ्गं, प्रसाराङ्गम् च इति अङ्गत्रयं भजते । शासनाङ्गे कन्नडं, संस्कृतं आङ्ग्लं चेति तिसृणामपि भाषाणां परिक्रमः प्रचलति । शैक्षणिकाङ्गे क्वचित् कन्नडस्य, अधिकं संस्कृतस्योपयोगः भवेत् । प्रसाराङ्गे तु कन्नडसंस्कृतेः शास्त्रसम्पन्नतार्थं संस्कृतस्य प्रधानग्रन्थानां कन्नडानुवादः आवश्यकः। एवं अपूर्वग्रन्थानां आङ्ग्लभाषयामपि अनुवादः, संस्कृते स्वतन्त्रग्रन्थप्रकटणं च अस्माकं अग्रिमलक्ष्यं भवेत् ।

विश्वविद्यालयः प्राचीन–आधुनिकज्ञानयोः युक्तसंयोजने दत्तावधानः। प्राधान्येन एतत् शैक्षणिकाङ्गे भवेत् । केवलं परीक्षाप्रचालनं शैक्षणिकाङ्गस्य लक्ष्यं न । तदर्थं योग्यं पाठ्यं पूरकपाठ्यरचना, परामर्शनग्रन्थनिर्माणम् अपि प्रधानं भवति । एतदर्थं इदानीं प्रसाराङ्गः आरब्धः ।

कर्नाटकराज्यं बहु प्राचीनकाले अनल्पान् संस्कृतग्रन्थान् असृजत्। मध्यकालीनसन्दर्भेऽपि तत् समेधितं च । आधुनिककाले तु तस्य

नूतनरीत्या अभिवर्धनस्यावश्यकता वर्तते । कर्नाटकराज्यं अभिलषितार्थचिन्तामणिः, शिवतत्वरत्नाकरः इति बृहद्विश्वकोशद्वयं प्रायच्छत्। शतशः शास्त्रकाराः, व्याख्यानकाराश्चाभवन् अस्मिन् राज्ये। अनेके शास्त्रग्रन्थाः निर्मिताः। शताधिकाः व्याख्यानकाराः संस्कृते अन्यादृशव्याख्यानानि व्यरचयन्।

कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योगदानेन नक्षत्रायमानाः अनेके महान्तः विद्यन्ते । इदं संस्कृतसाहित्येतिवृत्तं स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृतसाहित्येतिहासं समीचीनतया चित्रयति। किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्जनस्य इतिवृत्तरचना सम्यक् न जाता । कालक्रमेण इदम् अन्धकारयुगमिव सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० पर्यन्तम् एकस्य शताब्दस्य कालखण्डे कर्नाटकस्य विविधेषु प्रदेशेषु निवसतां संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदानविषये, तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्माकम् आशयः । अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः निर्मितः भविष्यति। एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकबन्धोऽपि दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां विदुषा गङ्गाधरभट्टमहोदयेन विदुषां श्री मण्डिकल् रामशास्त्रिमहोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्तकमिदं प्राकाश्यं नीयते। विद्वद्वरेण्यः कविः श्री गङ्गाधरभट्टमहोदयः निरन्तरं संस्कृतशास्त्रसेवायां रतः न्यायसाहित्यादिशास्त्रेषु कृतभूरिश्रमः । अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले विरचय्य प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः, डि.लिट्
कुलपतिः



मण्डिकल् श्रीरामशास्त्री

(१८४९-१९२९)

8

मण्डिकल् रामशास्त्री

सारस्वतोपासकाः विश्वसंस्कृतेः निधयः । तत्रापि अत्याकर्षकाः भवन्ति साहित्यकृषिशीलाः । तेषु मण्डिकल् श्रीरामशास्त्रिणः अन्यतमाः मान्याश्च । ऊनविंशतिशतके महीशूरसंस्थाने विराजमानाः एते मण्डिकल् श्रीरामशास्त्रिणः आर्यधर्मप्रकाशिका, चामराजेन्द्र–कल्याणचम्पूः, चामराज्याभिषेकचरितं, कृष्णराजाभ्युदयः, भैमीपरिणयः, मेघप्रतिसन्देशः, कुम्भाभिषेकचम्पूः, कथासप्ततिश्चेति कृत्यष्टकानां प्रणेतारः । इमाः कृतयः शास्त्रिणां बहुश्रुतत्त्वं क्रान्तदर्शित्वं च प्रमाणयन्त्यः विलसन्ति । साहित्यसरस्वत्याः विविधप्रकारेषु कृतश्रमाणां प्रथितयशसां मण्डिकल् श्री रामशास्त्रिणां जीवितवृत्तान्ते आकृतिः सहजतया उद्भवति । विद्याव्यवसायिनां तेषां जीवितवृत्तावगमेन नवीना प्रेरणा उपलभ्यते । अतः मण्डिकल् श्रीरामशास्त्रिणां जीवितवृत्तं कर्णाटकसंस्कृतविश्वविद्यालयस्य कर्णाटकसारस्वतोपासकग्रन्थमालायोजनायाः अङ्गतया किञ्चित् अत्र प्रस्तूयते ।

मण्डिकल्ग्रामः– मण्डिकल् श्रीरामशास्त्री इति नाम्नि मण्डिकल् इति ग्रामसंज्ञा । कर्नाटकराज्ये बेङ्गळूरूपकण्ठे चिक्कबळ्ळापुर इति पत्तनं अस्ति । कन्नडभाषायां चिक्क इत्यस्य लघु, ह्रस्वं इति वा अर्थः । बळ्ळ इति मापकसाधनविशेषः । ह्रस्वेन मापकसाधनेन लघुना वा यत्र धान्यादीनां क्रयविक्रयः प्रवर्तते स्म सः चिक्बळ्ळापुर शब्देन व्यवहृतस्स्यात् । तत्र चिक्कबळ्ळापुरान्तर्गतः ग्रामः मण्डिकल्नामा । कन्नडभाषायां 'मण्डि' इत्यस्य आपणमित्यर्थः । 'कल्लु' इत्यस्य शिला इत्यर्थः। यत्र शिलोपलक्षितं आपणमासीत् सः ग्रामः अन्वर्थतया मण्डिकल् इत्येव संज्ञितः स्यात् ।

जन्मवृत्तम् – तस्मिन् मण्डिकल् ग्रामे अप्पासामिजोय्स् इति कश्चन दैवज्ञः आसीत् । तस्य पुत्रः वेङ्कटसुब्बाशास्त्री । वेङ्कटसुब्बाशास्त्रिणः धर्मपत्नी अक्कणाम्बा । तयोः दम्पत्योः पुत्र एव श्रीरामः । स एव रामः प्राप्तविद्यः रामशास्त्री इति प्रसिद्धः। मण्डिकल् श्री रामशास्त्रिणः रथीतरसगोत्राः । स्वकृतिषु उपसंहारे स्वयं स्वगोत्रं उल्लिखन्ति शास्त्रिणः । तथा च श्रूयते–

रथीतरसगोत्रस्य रामनामकवेर्वचः ।
सम्मोदयतु चेतांसि साधु वासाधु वा सताम् ॥
इति ॥

तथा च भैमीपरिणयेऽपि उल्लिखितम् –

रथीतरास्सन्ति सन्तः श्रोत्रिया ब्रह्मवादिनः
तेषु वेङ्कटसुब्बार्यसुधीमणिसुतः कविः ॥१–९॥
इति ।

जन्मकालः – मण्डिकल् श्रीरामशास्त्रिणः जन्म १८४९ वत्सरे अभवत् । गर्भाष्टमे तेषां उपनयनसंस्कारः सुब्रह्मण्यक्षेत्रे संवृत्तः। अतः श्रीरामशास्त्रिणः उपनयनं १८५६ तमे संवत्सरे सम्पन्नः इत्यनुमीयते ।

उपनयनम् – उपनयनं च गुरोः समीपे शिक्षणार्थं प्रेषणम् । अतः उपनयनानन्तरं श्रीरामः मैसूरुनगरं नीत्वा तत्र द्विवेदिनां सान्निध्ये वेदग्रहणार्थं प्रापितः पित्रा । ते च ऋक्शाखाध्यायिनः। अतः द्विवेदिनां आचार्यत्वे ऋगध्ययनं प्रवृत्तम् । ऋक्संहितादि क्रमेण सम्प्रदायानुगुणं द्विवेदिभिः ऋग्वेदः समग्रः अध्यापितः। श्रद्धालुः रामः तेषां मार्गदर्शने ऋग्वेदम् समग्रं अधीत्य अध्ययनविधिं पर्यपालयत् । प्रत्यहं प्रातः ब्राह्मे मूहूर्ते उत्थाय स्नानसन्ध्यादिकमनुष्ठाय यदा यदा गुरुः अध्यापयति तदा तदा विधेयतया वेदाध्ययनं चकार । तथा अध्यापनप्रणाल्या समग्रो ऋग्वेदः कण्ठगतो बभूव । यदा अयं श्रीरामः षोडशवर्षदेशीयः

तदा पितुः मृत्युवार्ता आगता । अष्टौ वत्सरं यावत् अधीतविद्यः श्रीरामः पितृमरणवार्तां श्रुत्वा खिन्नः, पितृकर्म निर्वर्तयितुं स्वगृहं जगाम । एवं माकिं १८६५ वत्सरे गृहं प्रति निवृत्तः श्रीरामः पितुः उत्तरक्रियादिकं यथाविधि अन्वतिष्ठत् ।

संस्कृताध्ययनम्– अधीतवेदोऽपि श्रीरामः अनधिगतसंस्कृत–भाषः आसीत् । संस्कृतभाषाध्ययनरतिस्तु महती आसीत् । अतः स्वग्रामे एव संस्कृतं पठितुं ऐच्छत् । तत्र मण्डिकल् ग्रामे आसन् वेङ्कटरामाचार्यनामानः संस्कृतविद्वांसः । श्रीवेङ्कटरामाचार्याणां सविधे वर्षचतुष्टयं संस्कृतसाहित्याध्ययनं अकरोत् । रघुवंशं, कुमारसम्भवं, किरातार्जुनीयं, नैषधं, शिशुपालवधमिति पञ्चमहाकाव्यानां अध्ययनं स्वग्रामे एव सम्पन्नम् । एवं वेदेन सह साहित्यसुगन्धोऽपि श्रीरामेण आघ्रातः । इत्थं १८६९ वत्सरे तस्य साहित्यान्तम् अध्ययनं समाप्तम् । एवं द्वादशवर्षावधौ वेदसाहित्योभयविद्यासम्पन्नः रामः विंशतिवर्षे पदं न्यधात् ।

शास्त्राध्ययनस्पृहा – वेदसाहित्यविद्यासम्पन्नस्य एतस्य श्रीरामस्य शास्त्राध्ययनस्पृहा उत्पन्ना । काणादं पाणिनीयं च सर्वशास्त्रोपकारकं, एकेन हीनः काणः द्वाभ्यां हीनो अन्धः इति गुरुमुखात् अवगतः श्रीरामः नाहं शास्त्रकाणो भवेयं नवा शास्त्रान्ध इति चिन्तयन् व्याकरणं, तर्कं च अध्येतुं उत्तरभारतं अगच्छत् । तत्र बहूनां गुरुजनानां औदार्येण तर्कं व्याकरणं च आमूलचूडं जग्राह । इत्थं दक्षिणभारते प्रारम्भिकशिक्षणं अर्जयित्वा उत्तरभारते उपकारकशास्त्रयोः तर्कव्याकरणयोः अध्ययनं आलस्यं विना अकरोत् ।

सन्नरसप्रेमाश्रयः – एवं सततविद्याव्यवसायेन प्रत्यहं वर्धितः श्रीरामः । उत्तरभारते शास्त्राध्ययनं पूरयित्वा गुरुजनैः अनुमतः मैसूरुनगरं प्रति आगतः । तदा मैसूरुसंस्थानस्य राजा आसीत् श्रीकृष्णराजवडयार् बहद्दूर् । राजानः तु कन्नड, संस्कृतभाषाभिमानिनः आसन् । तेषां प्रोत्साहेन उभयभाषयोः

अभिवृद्धिः जाता । स्वयं संस्कृतज्ञाः एते तृतीयकृष्णराजवडयर् महाभागाः । अत एव पाण्डित्यप्रियाः पण्डितान् प्रोत्साहयन्ति स्म । न केवलं पण्डितानां प्रोत्साहनं किन्तु तादृश पाण्डित्यसम्पादनाय आसक्तान् शक्तान् छात्रान् प्रेरयन्ति स्म । छात्रवृत्तिप्रदानेनापि अनुगृह्णन्ति स्म । एते साहित्य, कला, शिल्प,विज्ञान, तन्त्रज्ञानेष्वपि दत्तादराः आसन् । अस्ति हि लोकगाथा यथा राजा तथा प्रजा इति ।

तेषां राजप्रासादस्य अधीक्षकाः आसन् बक्षिनरसप्पनामानः। उत्तरभारतात् प्रतिनिवृत्तं युवानं अधिगतविद्यं तेजस्विनं श्रीरामं बक्षिनरसप्पः पुत्रनिर्विशेषेण प्रेम्णा स्वगृहमाहूय तत्रैव वासाय प्रार्थनां अकरोत् । राजकार्यासक्तोऽपि अयं विद्वदभिमानी पितृहीनं श्रीरामं स्वगृहे एव संस्थाप्य पितृप्रीत्या अपालयत् । किंकर्तव्यमूढस्य श्रीरामस्य सदाश्रयः प्राप्तः । तस्य श्रीरामस्य विद्यापिपासां अवगम्य बक्षिनरसप्पः स्वेष्टं शास्त्रं अध्येतुं अवकाशं व्यवस्थां च अकल्पयत् ।

गहनन्यायावगाहनम् – तदा मैसूरुसंस्थाने पण्डितरत्न-सीतारामशास्त्रिणः बहुश्रुताः आसन् । तेषां सन्निधौ श्रीरामः नव्यन्यायशास्त्राध्ययनं अकरोत् । सूक्ष्मातिसूक्ष्मदृशा विषय-विश्लेषणकौशल्यविवर्धिनीं गादाधरीं अधीतवान् । तत्रापि शक्तिवाद-मुक्तिवाद-व्युत्पत्तिवाद-प्रामाण्यवाद-विधिवादेति पञ्चवादग्रन्थान् आमूलाग्रं वशमकरोत् । एवमेव अलङ्कारशास्त्रेऽपि प्रसिद्धान् सर्वान् अपि प्रकरणग्रन्थान् गुरुमुखतः एव साम्प्रदायिकाध्ययन-क्रमणैव अध्यगात् ।

विद्वत्पदवीप्राप्तिः – एवं न्यायव्याकरणालङ्कारशास्त्रप्रवीणोऽपि न कामपि परीक्षां स्वीचकार श्रीरामः । यतः तदा परीक्षाव्यवस्था एव मैसूरुसंस्थाने नासीत् । यदा मैसूरुसंस्थाने इदम्प्रथमतया श्रीमन्महीशूरमहाराजसंस्कृतमहापाठशालायां परीक्षाव्यवस्था उपक्रान्ता तदा १८८४ वत्सरे श्रीरामशास्त्री प्राथमिकसाहित्यविद्वत्

परीक्षां स्वीकृत्य उत्तीर्णो अभवत् । एवं साहित्यविद्वत् पदवीविभूषितो अभवत् श्रीरामशास्त्री ।

उद्योगयोगः – बक्षीनरसप्पः एतेन अत्यन्तं आनन्दं अन्वभवत्। स न केवलं श्रीरामशास्त्रिणं पुत्रप्रेम्णा पर्यपोषयत् । किन्तु शास्त्राध्ययनसौकर्यमपि अकल्पयत् । अपि च तेन संस्कृत–विद्याभिमानिना मैसूरुनगरे शारदाविलासाख्या कापि पाठशाला स्वार्जितेन धनेन प्रतिष्ठापिता आसीत् । अहरहः पाठशालायाः विकासं चिन्तयता अनेन स्वगृहे एव विद्यानिधिः श्रीरामः सम्प्राप्त इति सन्तोषोऽनुभूतः । तं विद्यावन्तं समर्थं शारदाविलास–संस्कृतपाठशालायाः चिराध्यक्षपदे १८८५वत्सरे अभ्यषेचयत् । विद्याविनयभरिताः श्रीरामशास्त्रिणः स्वगतां सकलां कलां परस्मिन् जिज्ञासुजने सङ्क्रामयितुं सन्नद्धा आसन् । अहर्निशि तत्र छात्रान् अध्यापयामासुः । शास्त्रग्रन्थग्रन्थीन् विच्छिद्योच्छिद्य शिथिलीकृत्य शिष्यान्तरङ्गे सङ्क्रामयामासुः शास्त्रार्थान् अन्यूनानतिरेकेण । अध्यापनकाले शास्त्रविषयात् गम्भीरात् व्यावृत्तमुखान् अन्तेवासिनः ज्ञात्वा कथौषधिभिः तान् सम्मुखान् सम्पाद्य शास्त्रशुश्रूषाम् वर्धयन्ति स्म । शिष्यचित्तापहारिणः गुरोः चमत्कारेण अयांसि इव अयस्कान्तेन आकृष्टाः छात्राः आसन् । एवं परश्शतान् शिष्यान् पण्डितान् अतानीत् । एवं अध्ययनाध्यापनाभ्यां प्रत्यहं प्रवर्धमाना इमे श्रीरामशास्त्रिणः न कदापि अधिजिगांसाविमुखा जाताः । एतत्समये एव वेदान्तनिषेवणे मतिरुत्पन्ना । व्युत्पन्नस्य अस्य वेदान्तं अध्यापयितुं को वा समर्थः स्यात्?

वेदान्तनिषेवणम् – तदा श्रीशृङ्गगिरेः दक्षिणाम्नायपीठे जगद्गुरवः शिवाभिनवसच्चिदानन्दभारतीगुरुचरणाः विराजन्ते स्म । ते तु प्रस्थानत्रये अभिज्ञा आसन् । श्रीरामशास्त्रिणः तेषां सन्निधावेव उपनिषत्, ब्रह्मसूत्रं, गीतेति प्रस्थानत्रयभाष्यशान्तिं आतन्वन् । इत्थं वेदान्तनिषेवणेन आत्मानं धन्यं अमन्वत । साहित्यालङ्कार–न्यायव्याकरणवेदान्तविद्यापारङ्गताः इमे श्रीशास्त्रिणः कर्णाटकस्य

विद्यामणिरिति प्रथां प्रापुः । तत्र मण्डिकल् श्रीरामशास्त्रिणः भैमीपरिणयाख्ये स्वकृते नाटके स्वस्य अध्ययनश्रियं क्रमशः उल्लिलिखुः । तथा च श्रूयते –

आद्ये वेदमधीतवान् गुरुमुखादाषोडशाब्दं ततः
तर्कव्याकृतिसाहितीरधिजगे त्रिंशाब्दकालावधि ।
अद्वैतेऽथ रतो जगद्गुरुवरादभ्यस्त भाष्यत्रयः सोऽयं
पण्डितमण्डलीबहुमतः श्रीरामनामा कविः ॥ १०॥

इति ।

इत्थं मण्डिकल् श्रीरामशास्त्रिणः सम्स्कृतसाहित्यसरस्वत्याः उपासनां सश्रद्धं विधाय ऊनविंशतिशतके कर्णाटके विकसितपाण्डित्यपद्ममिव शोभन्ते स्म ।

साहित्यसलिलपायनम् – स्वयं संस्कृतसाहित्याब्धिं अवगाह्य शान्तस्वान्ताः आसन् । स्वशान्तिं लोके वितरीतुं संस्कृतसाहित्य–सारवारिभरितग्रन्थकुम्भनिर्मितौ मनश्चक्रे ।

सलीलं साहित्यसलिलं पाययितुं गुरुजनात् अधिगतां विद्यां अध्ययनाध्यापनस्वाध्यायैः परिपुष्टां प्रसारयितुं लेखनोन्मुखाः जाताः। स्वधीतिबोधाचरणप्रचारणैः पाण्डित्यं स्वार्थायेव परार्थायापि प्रभवति इति मन्वानाः शास्त्रिणः लेखने प्रवृत्ताः ।

शास्त्रिणः आर्यधर्मानुयायिनः अभिमानिनश्च आसन् । तदा विदेशीयानां प्रभावात् आर्यधर्मे श्रद्धा शिथिलायमाना आसीत् । आर्यधर्मसारं सरलया भाषया समासेन सयुक्तिकं प्रसार्येत चेत् तदा तत्र श्रद्धा उदियात् इति मत्वा आर्यधर्मप्रकाशिका इति ग्रन्थं व्यरचयन् । १८९०वत्सरे अयं ग्रंथः महीशूरपुरे राजकीयशाखा मुद्राक्षरशालया सम्मुद्रिता ।

आर्यधर्मप्रकाशिका – अयं च ग्रन्थः आर्यमततत्त्वजिज्ञासु–जनानां उपयोगाय विरचितः । एतत् ग्रन्थविरचने श्रीमन्महीशूर–

महाराजचामराजेन्द्रानुज्ञा निदानम् । श्रुतिस्मृत्यादिप्रतिपादितान् विषयान् सङ्गृह्य सविमर्शं विरचितो अयं ग्रन्थः ।

ग्रन्थोऽयं भागद्वयघटितः पूर्वभागः उत्तरभागश्चेति । पूर्वभागे पुरुषार्थनिरूपणं, भगवत् स्वरूपनिरूपणं, प्रवृत्तिधर्मनिरूपणं चेति प्रकरणत्रयं अस्ति । उत्तरभागे निवृत्तिधर्मप्रकरणं, सृष्टिप्रकरणं, प्रळयप्रकरणं, योगप्रकरणं, मतप्रकरणं, चेति प्रकरणपञ्चकं अस्ति ।

तत्र अस्य ग्रन्थप्रणयनोद्देशः तावत् शास्त्रिभिरेव पीठिकायां इत्थं निर्दिष्टः– 'तस्य खलु महाराजाधिराजस्य श्रीमतः चामराजेन्द्रस्य शासनानुसारेण द्विगुणितोत्साहैः कैश्चित् लौकिकैः वैदिकैश्च महद्भिः विद्वद्भिः संसदि समालोच्य, इदानीं किल काले स्वयं इतरविद्यासम्प्रदायादीनां अतिप्रचारतया वेदशास्त्र–विहितसम्प्रदायमार्गाणां विरलप्रचारतया च कालक्रमेण स्वयं आर्यमतसम्प्रदायाः श्रुतिमात्रगोचरीभवेयुः । अतः तदभिवर्धनोपायः परिचिन्तनीयः । इदं खलु महाराजपरिपाल्यमानम् आस्थानम् । अत्र किल बहवः प्रबन्धयितारः, प्रबोधयितारः, प्रचारयितारः, प्रोत्साहितारश्च प्रकाशन्ते । तदत्र अयमारम्भः प्रथमतः किञ्चित् प्रवर्तितश्चेत् तत्र तत्र देशान्तरेऽपि ते ते महान्तः स्वयं इतोऽप्यतिशयेन प्रबन्धयन्तः, प्रचारयन्तः, प्रोत्साहयन्तश्च प्रवर्तेरन् । ततश्च स्वयं आर्यमतसम्प्रदायाः प्रचुरप्रचाराः प्रवर्धेरन् । अतः तदनुकूलमार्गं निश्चिचीषुभिः अस्माभिः इदानीं नानाविधप्रभेदशालिनां तत्तदार्यमतानां परस्पराविरुद्धमार्गेण सर्वजनाभिमतं निखिलधर्ममार्गज्ञानमार्गप्रदर्शकं दृढतरं अभ्यस्यतां आर्यबालानां स्वतः तत्तद्ग्रन्थसमवलोकनपाटवोत्पादकं सुललितं अखिलशास्त्रतत्त्वाभिव्यञ्जकं निखिलसंशयभञ्जकं सकल–सहृदयानुरञ्जकं च कञ्चित् ग्रन्थं कारयित्वा तत्तद्भाषान्तरेण

परिवर्तयित्वा तत्र तत्र पाठयित्वा च प्रचारः परिकल्पनीयः इति निरणायि । तदनु ग्रन्थकरणाय श्रीमन्महाराजानुज्ञया समभावि । ततः –

श्रीमच्चाममहीन्द्रमन्त्रिमणिना शेषाद्यभिख्यावता
दर्बार्बक्षिपदाङ्कितेन नरसिंहार्येण चोत्साहितः ।
तैः सभ्यैश्च तदा प्रचोदितमतिः श्रीरामनामाकवि
र्बालानां उपयोगिनं वितनुते तत्त्वावबोधोद्यमम् ॥

श्रुतिस्मृतिपुराणेतिहासाद्यर्थान् सुविस्तृतान् ।
सोऽहं सङ्गृह्य रचयाम्यार्यधर्मप्रकाशिकाम् ॥

इति ।

इत्थं च आर्यधर्मप्रकाशिकाग्रन्थः प्रायोगिकतया प्रथमं मुद्रापयित्वा तत्तन्महाजनाभिप्रायबुभुत्सया भारतवर्षभूषणभूत–तत्तन्महाजनोपकण्ठं अनीयत । ते महान्तः स्वयं अमुं ग्रन्थं आमूलाग्रं अवलोक्य स एष ग्रन्थः सर्वजनसम्मतः सकल–जनोपकारक्षमश्च इति स्वाभिप्रायान् तत्र तत्र योजनीयांशांश्च केचित् अनुमोदपत्रिकाप्रधानमुखेन, केचित् कुशलपत्रिकामुखेन, केचित् वृत्तान्तपत्रिकामुखेन प्राचीकटन् ।

श्रीमन्महाराजसदास्थानभूषणायमानाः पण्डितवरेण्याः श्रीमन्महाराजानुज्ञया स्वकीय पारमार्थिकधिया च समुत्साहिताः तत्र तत्र परिशोध्य सकललोकोपकारक्षमीचक्रुः । तदनन्तरं साधु परिशोध्य द्वितीयमुद्रणं आपादितो अयं ग्रन्थः । अतः दृढविश्वासेन उल्लिखन्ति शास्त्रिणः 'अयं ग्रन्थः आर्यमततत्त्वजिज्ञासूनां उपयुक्तस्यादेवेति प्रत्येमि' इति ।

तत्र आर्यधर्मप्रकाशिका ग्रन्थमवलोक्य विश्वप्रसिद्धः एफ़. माक्स्मुल्लर् महाभागः आक्स्फर्ड्तः १८९१ संवत्सरस्य मार्च् मासे अष्टमे दिनाङ्के पत्रमेकं अलिखत् । तथा च माक्स्मुल्लर् पत्रं अत्र निबध्यते ।

OXFORD, *March 8, 91*.

DEAR SIR,

Accept my best thanks for your *Aryadharma-prakashika*. I have read your book with much pleasure. It contains much useful information, and I hope you will continue your labours which reflect credit on you and your enlightened patron, the Maharaja of Mysore.

Believe me

Yours faithfully,
F.MAXMULLER.

MANDIKAL RAMA SASTRI,

MYSORE.

एवमेव षोडशमहापण्डितानां अभिप्रायः आर्यधर्म-प्रकाशिकाग्रन्थविषये अस्मिन् एव ग्रन्थे नियोजितः ।

एतेन ज्ञायते अखण्डे प्रपञ्चे विद्वद्वलये मण्डिकल् श्रीराम-शास्त्रिणां अयं ग्रन्थः प्रसारितः तैरनुमोदितः प्रशंसितश्चेति । एवं विश्वमान्याः पण्डिताः इति प्रसिद्धिं अलभन्त ।

सांसारिकं वृत्तम् – तत्र किञ्चित् प्रस्तूयते रामशास्त्रिणां सांसारिकं वृत्तं किञ्चित् । श्रीरामशास्त्रिणः द्वे भार्ये आस्ताम् । सुब्बम्मा इति प्रथमा भार्या आसीत् । रामशास्त्रिणा सुब्बम्मागर्भाम्बुधौ एकः पुत्रः, तिस्रः पुत्र्यः उत्पन्नाः । सा सुब्बम्मा अकाले मृत्युवशं गता । शास्त्राप्तधैर्याः शास्त्रिणः पत्नीवियोगदुःखं सोढ्वा स्वापत्यानि सम्यक् अपालयन् ।

शास्त्रिणः न केवलं पाठशालायां अध्यापयामासुः । किन्तु राजप्रासादं गत्वा तत्र महाराज्ञीं संस्कृतं अध्यापयामासुश्च ।

एतेन राजपरिवारे श्रीरामशास्त्रिणि गौरवातिशयः आसीत् । यदा मैसूरुमहाराजः चामराजवडयर् महाभागः दिवंगतः तदा चतुर्थः राजा कृष्णराजवडयर् महाशयः सोपस्करं उपायनं पितृस्मृतौ दातुं ऐच्छत् । सोपस्करोपायनं नाम गृहेण सह धनधान्यवस्त्रादीनां प्रदानम् । तच्च दानं सद्वितीयायैव देयमिति धर्मविधिः वर्तते । कृष्णराजवडयर् एतद्दानं सत्पात्रे एव प्रतिपादयितुं इयेष । को वा अन्यः रामशास्त्रिणः ऋते एतद्दानं प्रतिपादयितुं इति अचिन्तयत् विद्यया विनयेन आचारविचाराभ्यां च अद्वितीया अपि शास्त्रिणः द्वितीयारहिततया अद्वितीया इति तेषु सोपस्करोपायनं प्रतिपादयितुं न शक्यते इति अचिन्तयन् । अतः उपायान्तरं अन्विष्य श्रीरामशास्त्रिणः द्वितीयो विवाहः करणीय एवेति सञ्चिन्त्य तथैव असूचयन् । एवं राजादेशं उपगम्य अद्वितीयतां परिहर्तुं द्वितीयां द्वितीयां रुक्मिणीनाम्नीं ऊढवन्तः । इत्थं अद्वितीयाः श्रीरामशास्त्रिणः सद्वितीया जाताः । तदनन्तरं महाराजः श्रीरामशास्त्रिभ्यः चामराजपुरं मध्ये १०६९ सङ्ख्याङ्कितं गृहं सपरिकरं धनधान्यवस्त्रैः सह सोपस्करोपायनत्वेन प्रत्यपादयन् ।

मण्डिकल् श्रीरामशास्त्रिणा रुक्मिणियम्मागर्भाम्बुधौ पञ्चपुत्राः, चतस्रः पुत्र्यः जाताः । एवं आहत्य त्रयोदशापत्ययुतः बृहत् परिवारः शास्त्रिणां आसीत् । तत्र ज्येष्ठः एम्.आर्.वेङ्कटसुब्ब-शास्त्री । स च पिता इव संस्कृतपण्डितः आसीत् । श्रीमन्महाराज-संस्कृतमहापाठशालायां प्रांशुपालः आसत् । इतरे पुत्राः विभिन्नक्षेत्रेषु कृतव्यवसायाः तत्र तत्र उद्योगिनो आसन् ।

श्रीरामशास्त्रिणः धार्मिकश्रद्धालवः उदारिणश्च आसन् । वेदाध्येतृभ्यः संस्कृताध्येतृभ्यः च छात्रेभ्यः साहाय्यं आचरन्ति स्म । चामराजपुरं मध्ये गीतावीथ्यां विराजमानस्य प्रसन्न-विश्वेश्वरस्वामिदेवस्थाने १९२६ वत्सरे प्रवृत्ते लिङ्गप्रतिष्ठापने अन्नसन्तर्पणे च व्ययं सर्वं निरवहन् । एवं सामाजिकसेवायां अपि निरता आसन् ।

भगवत्प्रार्थना – अयं लघुतरः ग्रन्थः । १८९९ वत्सरे श्रीमन्महाराजसंस्कृतमहापाठशालायां यदा प्रधानपण्डिता आसन् तदा अयं ग्रन्थः विरचितः । अस्य ग्रन्थस्य पीठिकायां लिखितम्– 'तत्तन्मत बोधनाय, नीतिबोधनाय सामान्यजनोपयोगाय परिशुद्धा स्तुतिः प्रार्थना च अत्र सङ्गृह्यते इति ।

अयं ग्रन्थः प्रथमप्रार्थना, द्वितीयप्रार्थना, तृतीयप्रार्थनेति भाग–त्रयघटितः । तत्र प्रथमे भागे श्रुतिस्मृतिपुराणेतिहासोक्ताः प्रार्थनाः, स्तुतयश्च सङ्गृह्य सरलसरसार्थनिरूपणेन सह निबद्धाः । द्वितीये भागे व्यासपराशरादिमहर्षिप्रोक्तानां श्लोकानां सङ्ग्रहोऽस्ति । तृतीये भागे तत्तन्मताचार्यैः रचिताः स्तुतयः सङ्गृहीताः । एतेन तेषां मतनिरपेक्षता गम्यते । आर्यधर्मसंरक्षणाय एतादृशानां स्तुतीनां प्रार्थनानां च प्रत्यहं पठनपरम्परा गृहेषु प्रवर्तनीयेति उद्देशेन अयं ग्रन्थः प्रणीतः ।

भैमीपरिणयनाटकम् – श्रीरामशास्त्रिणः अन्या कृतिः भैमीपरिणयनाटकम् । अत्र दशाङ्कानि सन्ति । नलदमयन्त्योः कथा एव अस्य नाटकस्य वस्तु । अस्य मूलाधारस्तु महाभारतस्य वनपर्वीयं नलोपाख्यानं, श्रीहर्षस्य नैषधीयचरितं च । नैषधीयचरिते नलदमयन्त्योः विवाहान्तकथामात्रं विवृतम् । नलोपाख्याने तु तयोर्विवाहः, नले कलिप्रवेशः, राज्यहानिः, वनवासः, दमयन्तीत्यागः, कार्कोटकसर्पदंशनेन नलवैरूप्यं, ऋतुपर्णस्य सारथ्यं, दमयन्त्याः विदर्भप्राप्तिः, नलान्वेषणाय द्वितीयस्वयंवरव्यवस्था, ऋतुपर्णात् अक्षविद्याप्राप्तिः, नलदमयन्त्योः समागमः, राज्यप्राप्तिश्च वर्णितः। एतदाधारेण भैमीपरिणयनाटके किञ्चित् विपरिणतं वस्तु प्रतिपादि–तम् । श्रीरामशास्त्रिणः न्यायालये न्यायनिर्णयपद्धतिं सप्तमाङ्के विवृण्वन्ति । दशमाङ्के रूपहरणं इति शीर्षिकया गर्भाङ्कं नियोज–यन्ति । पुरातनेयं कथा कविनैपुण्येन नवीना जाता ।

महाराजानुज्ञया सर्कारीमुद्रणालये १९१४ वत्सरे इदं नाटकं मुद्रितम् । प्रधानाभियन्ता कर्पूरश्रीनिवासरायः आङ्लभाषया आमुखं

अलिखत् । श्रीरामशास्त्रिणः प्रत्येकस्य अङ्कस्य कथास्वारस्यं विषयानुक्रमेण सरलया संस्कृतभाषया विलिख्य पठनसौकर्यं कृतवन्तः ।

मेघप्रतिसन्देशः – १९२३ वत्सरे मेघप्रतिसन्देशाख्यः पद्यग्रन्थः विरचितः । महाकविश्रीकालिदासकृतमेघसन्देशवचनानुरूपः यक्षीप्रत्युत्तररूपः मेघप्रतिसन्देशः । तस्य व्याख्यानमपि श्रीराम–शास्त्रिभिः कृतम् । तत्र मेघसन्दशे सर्गद्वयं वर्तते । प्रथमसर्गे ६८ श्लोकाः विद्यन्ते चेत् द्वितीयसर्गे ९६ श्लोकाः सन्ति । आहत्य अस्मिन् ग्रन्थे १६४ श्लोकाः विद्यन्ते । येन छन्दसा महाकविना कालिदासेन मेघसन्देश इति खण्डकाव्यं विश्वमान्यं मधुरं विरचितं तेनैव छन्दसा कालिदासाशयं पूरयितुमेव अयं मेघप्रतिसंदेशः विरचितः । मेघसन्देशे उत्तरमेघे कालिदासेन यक्षयाचना कृता स्वकुशलं सन्दिश्य तत्कुशलसन्देशानयनाय । तथा च श्लोकः –

आश्वास्यैवं प्रथमविरहोदग्रशोकं सखीं ते ।
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ॥
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि ।
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥५३॥

यक्षेण वारिवाहं प्रति स्वकान्तायाः प्रत्युत्तरप्रणयनं प्रार्थितम् । तमिममवसरम् अवगम्य कान्तायाः सन्देशः कान्तं प्रति किं स्यात्? इत्युत्प्रेक्ष्य अयं ग्रन्थः संरचितः । तादृशप्रत्युत्तरपरः प्रबन्धः न कश्चित् उपलभ्यते । इमं शिष्टं कार्यं पूरयितुं धैर्यं न भवति । यतः विश्वविख्यातस्य कविकुलगुरोः वचसि सति तदुद्योजनेन को वा जनः उद्युङ्क्ते ? किन्तु मण्डिकल् श्रीरामशास्त्रिणः तस्मिन्साहसकर्मणि ।अत्मानम् उद्योजयन् ।

तत्र अष्टषष्ट्या परिशोभिते प्रथमसर्गे विरहविह्वला यक्षवधूः मेघराजात् स्वप्रियसन्देशान् आकर्ण्य प्रतुष्टान्तरङ्गा मेघम् अनुनीय तद्वदनेनैव पुनः कान्तं प्रति कान्तायाः सन्देशं प्रेषयिष्यति ।

स्वावस्थां, स्वगृहावस्थां च निवेदयिष्यति। वाग्रूपाभिज्ञानप्रदानव्याजेन वैश्रवणदत्तशापप्रकारं तत् परिहारक्रममपि अवबोधयति । सद्यः प्रियागमनं अर्थयामास इति वस्तु अत्र प्रथमे सर्गे निबबन्ध ।

द्वितीये सर्गे षण्णवतिपद्यैः द्रष्टव्यवस्तुकथनादिभिः मेघम् अभिमुखीकृत्य तस्य शीघ्रगमनार्थम् अलकाम् आरभ्य रामगिरिपर्यन्तं ऋजुमार्गम् उपदिशति । भर्तृविरहचापल्यात् देशान्तरगमनं आशङ्क्य ऋजुमार्गेण गन्तुं प्रार्थयति । मध्ये वनगिरिसरित्तीर्थपुष्पपुर–क्षेत्रदेवतायतनानि निर्दिशति । मेघस्वभाववैभवं निर्वर्ण्य प्रोत्साह्य स्वप्रियानयनाय मेघं प्रार्थयदिति सुष्ठु प्रतिपादितम् ।

मन्दाक्रान्तावृत्तम् उचितमिति चितं श्रीमद्भिः शास्त्रिभिः । तत्र कवेः चातुर्यं स्पष्टं अवगम्यते । विप्रलम्भशृङ्गाररसस्य प्रतिपादने कामावस्थादशकमपि एकस्मिन् एव श्लोके समायोजितः । मेघसन्देशव्याख्याने मल्लिनाथेन ताः अवस्थाः कथिताः । तथा च अवस्थासङ्ग्रहः –

दृङ्मनस्सङ्गसङ्कल्पा जागरः कृशता रतिः ।
ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश ॥ इति

तत्र इमाः दशाः न कुत्रापि काव्येषु एकत्र समाविष्टाः दृश्यन्ते । विभिन्नाः दशाः अनेकैः श्लोकैः अनेकत्र निरूपिताः दृष्यन्ते । किन्तु अयं कविः मेघप्रतिसन्देशे प्रथमसर्गे यक्ष्यवस्थां निरूपयन् एकत्रैव दशावस्थाः सञ्जग्राह । तथा च श्लोकः –

द्रष्टुं दृष्टिः प्रचलति मनः कर्षति ध्यातुमन्त
र्निर्निद्रा धीर्वशयति तनुः क्षीयते त्वामलब्ध्वा ।
दिव्यान्भोगानपि मम रुचिर्द्वेष्टि लज्जा प्रवासा–
दुन्मत्तासं न विदितमथो मूर्छिता वान्यथा वा ॥
१–५॥ इति

अत्र यक्षीप्रतिसन्देशे तत्कालिकभिन्नानामपि श्री शङ्कराचार्य–

श्रीरामानुजाचार्यादीनां वर्णनं अस्ति । श्रीविजयनगराधीश–महीशूरमहाराजादीनां विद्युद्दीपनवीनशिल्पानां च वर्णनं कृतम् । एतच्च कवीनां भूषणाय न तु दूषणाय । तद्व्याजेन कविः स्वानुभूतिम् अत्र ग्रन्थे निबध्नाति ।

मेघसन्देशे यक्षः अनामिकः । यक्षी च अनामिका । किन्तु अत्र मेघप्रतिसन्देशे तयोः दम्पत्योः नामधेयं यक्षीयम् अधिकारं तत्पितृनामधेयं च उत्प्रेक्ष्य प्रदर्शितं विशेषावधानमर्हति । तथा च प्रथमसर्गे श्रूयते –

कोशाध्यक्षः प्रभुमनुगतो रत्नकण्ठस्य पुत्रः
चित्रग्रीवः श्रुणुत गृहिणीं स्वर्णमालां विहाय ।
हृत्वा काञ्चित् क्वचन निरगादित्यसौ कापि वार्ता
कर्णात् कर्णं प्रविशति पुरे किं करोमि क्व यामि
॥ १–४०॥

एवं यक्षस्य नाम चित्रग्रीवः, तस्य पिता रत्नकण्ठः, चित्रग्रीवः कोशाध्यक्षः, तस्य पत्नी स्वर्णमाला इति या उत्प्रेक्षा कविभिः श्रीरामशास्त्रिभिः कृता सा स्तुतिम् अर्हति । एवं महाकविना कालिदासेन कश्चित् कान्तः काचित् कान्ता च नामधेयमन्तरा उल्लिख्यते चेदपि स्वकल्पनाशक्त्या तयोः नामधेयं निर्दिश्य स्वप्रतिभां प्रकाशयामासुः श्रीरामशास्त्रिणः ।

मेघसन्देशे भारतस्य भौगोलिकं चित्रणं वास्तवं मनोहारि दृश्यते । श्रीरामशास्त्रिभिरपि भारतदेशस्य भौगोलिकं चित्रणं सम्यगेव कृतम् । एतेन श्रीरामशास्त्रिणां कोशबलमिव देशपर्यटन बलमपि उन्नेतुं शक्यते । कर्णाकर्णितया वा साक्षात् सन्दर्शनेन वा ये ये प्रदेशाः अवगताः ते प्रदेशाः आकर्षकशैल्या मेघप्रतिसन्देशे संस्तुताः । तत्र तौलनिकदृष्ट्या कालिदासस्य श्रीरामशास्त्रिणश्च मार्गोल्लेखः अवधानम् अर्हति ।

कालिदासोपदिष्टमार्गः – चित्रकूटम् > आम्रकूटः > नर्मदानदी > दशार्णः विशाला वा > नेत्रवती > नीचैर्गिरिः> उज्जयिनी > निर्विन्ध्या > विशालपुरी > शिप्रानदी गम्भीरानदी> देवगिरिः > चर्मण्वतीनदी > दशपुरं ब्रह्मावर्तः > कुरुक्षेत्रम्> सरस्वतीनदी > गङ्गानदी > हिमवत्पर्वतः > कैलास- शिखरम्>अलकापुरी । एवं चित्रकूटादारभ्य अलकान्तस्य मेघगमनमार्गः कालिदासेन निर्देशितः ।

श्रीरामशास्त्रिनिर्दिष्टो मार्गः – अत्र हिमालयादारभ्य धनुष्कोटिपर्यन्तं रत्नमालया यक्ष्या मेघाय गमनमार्गः उक्तः । तत्र श्रीरामशास्त्रिभिः दक्षिणभारतस्य प्रसिद्धानि स्थलानि वर्णितानि इति च विशेषः । तत्र श्रीरामशास्त्रिभिः मार्गदर्शने अयं क्रमः अनुसृतः –हिमालयः > काश्मीरम् > पञ्जाब् > देहली > अमृतसरः > सिम्ला > उदयपुरं > चित्तोड् > राजस्थानं > उज्जयिनी विशालपुरी > विन्ध्यगिरिः > विदर्भः > आन्ध्रः > रामदुर्गः > ऋष्यमूकः > पेनुगोडाम्> मण्डिकल् > नन्दीदुर्गः> कल्याणपुरी (बेङ्गलूर्) > रामगिरिः > यदुगिरिः > श्रीरङ्गपत्तनम्> मैसूरु > नञ्जनगूडु > तिरुवन्तपुरं > कोच्चिन् > कालटि > मधुरै > दर्भशयनं > रामसेतुः > रामेश्वरं > धनुष्कोटिष्च

श्रीरामशास्त्रिणः द्वितीये सर्गे मार्गदर्शनव्याजेन भारतस्य भौगोलिकं परिचयं चिकीर्षन्ति । तत्र स्वग्रामस्यापि उल्लेखं साभिमानं कुर्वन्ति । तत्र स्वपितुः पितृव्यस्य पितामहस्य च स्मार्तपण्डितानां, वेङ्कटरामाचार्य वरदाचार्यादि श्रीवैष्णवपण्डितानां, शिष्टाचारशीलानां स्त्रीपुरुषाणां च सान्निध्यमस्ति इति उल्लिखन्ति ।

तथा च मण्डिकल् ग्रामं गन्तुं प्रार्थयति –

प्रस्थायाथ प्रविश नगरं पण्डितैर्मण्डितं त्व-
न्मार्गे तस्मिन् महितचरितं मण्डिकल् नामधेयम् ।

यस्योपान्ते रघुपतिधनुस्त्र्याचितव्यामदीर्घं
घोषाद्रौ प्रणमति जनो वेणुरूपं गुहायाम् ॥५५॥

अत्र यद्यपि श्लोके न स्वपरिवारविवरणं लभ्यते । किन्तु तत् व्याख्याने श्रीरामशास्त्रिभिः तद्विवृतम् । तथा हि – 'अथ पेन्गोण्डाख्यनगरगमानानन्तरं तस्मिन् **त्वन्मार्गे पण्डितैः** एतत् कविपितृव्यपितामहादिस्मार्तपण्डितैः वेङ्कटरामाचार्यवरदाचार्य–प्रभृतिभिः श्रीवैष्णवपण्डितैश्च **मण्डितम्** आलङ्कृतं **महितचरितं** सच्चरित्रानुवर्तिस्त्रीपुरुषभरितं **मण्डिकल् नामधेयं नगरं प्रविश'** इति ।

एवम् अस्मिन् मेघप्रतिसन्देशे मैसूरुविश्वविद्यालयस्य श्रीमन्महा–राजसंस्कृतपाठशालायाश्च वर्णनं कृतम् । तत्र यक्षः चित्रग्रीवः स्यात् । तं तत्र अन्विष इति प्रार्थयति रत्नमाला यक्षी । तथा च श्लोकः –

तद्गर्भस्थे तरुणभरिते विश्वविद्यालये वा
विद्यार्थिभ्यो विभुविरचिते वेदशास्त्रालये वा ।
आस्थाने वा महितविभवे मेरुशृङ्गायमाणे
भूयो भूयो विचिनु मम तं प्राणनाथं प्रयातम् ॥८१॥

तत्र महाबलाद्रौ स्थित्वा अधस्तात् रात्रौ विद्युद्दीपालङ्कृतं मैसूरुनगरं द्रष्टुं प्रार्थयन्त्या रत्नमालायाः मुखात् नगरवर्णनम् अकारयन् । तथा च श्लोकः –

तत्र स्थित्वा महिसुरपुरीं वीक्षसे यद्यधस्तात्
तत् सौभाग्यं सकलमपि ते नेत्रपात्रं तदा स्यात् ।
विद्युद्दीपैः निशि परिवृता या समस्तेऽपि देहे
राज्ञा रत्नाभरणनिखरैः भूषितेवावभाति ॥ ८३ ॥

एवं मण्डिकल् श्रीरामशास्त्रिणः मेघप्रतिसन्देशकाव्ये वर्णितो विषयः सर्वानुभवसाधारणः । किन्तु कविभिरेव खलु तद्वर्णनं

कर्तुं शक्यते । अयं च मेघप्रतिसन्देशः तेषां कृतिषु अत्यन्तं जनप्रियः । मण्डिकल् श्रीरामशास्त्रि ट्रस्ट् द्वारा अयं ग्रन्थः कन्नडभाषया अनूदितः श्रीमत्या डा॥ एस्.आर्.लीलया, श्री डा॥ बि.एस्.रामकृष्णेन च ।

शास्त्रिणः कालिदास इव अर्थान्तरन्यासविन्यासेऽपि निपुणाः। तथा मेघप्रतिसन्देशे तत्र तत्र अर्थान्तरन्यासमुखेन इमाः भणितयः निर्गलिताः । ताः लोकगाथा इव आकर्षकाः ।

लोके सन्तो न हि खलु परप्रार्थनां व्यर्थयन्ति ।१-१

पूर्णे दानं भवति हि वृथा वारिदानं यथाब्धौ ।१-६

शुद्धे चित्ते भुवनमखिलं पुण्यतीर्थायते हि ।१-१२

कुम्भाभिषेकचम्पूः – १९१७ वत्सरे श्रीरङ्गस्थवाणीविलास-मुद्रणालयतः प्रकाशितो अयं ग्रन्थः । श्रीनाल्वडी कृष्णराजवडयर् शासनकाले शृङ्गगिरौ प्रवृत्तस्य शारदाम्बायाः कुम्भाभिषेकवर्णनम् एव अस्य ग्रन्थस्य उद्देशः । यद्यपि कुम्भाभिषेकः कश्चन धार्मिक-महोत्सवः । किन्तु तस्य उत्सवस्य प्रक्रिया यथावत् ऐतिहासिक-दृष्ट्या काव्यमर्यादया अत्र प्रपञ्चिता । अत्रवस्तुस्थितिम् अनुल्लङ्घ्य काव्यकमनीयतया चम्पूमाध्यमेन तरङ्गद्वयं निबद्धम् । प्रथमे तरङ्गे श्रीचन्द्रशेखरभारतीस्वामिनि गौरवम् आवेद्य, विद्यागुरोः अभिनव-नरसिंहभारत्याः मूर्तिप्रतिष्ठापनं कुम्भाभिषेकपूर्वसिद्धता सभा च वर्ण्यते । द्वितीये तरङ्गे आगतानां महाराजानां वैभवं, अन्नसन्तर्पण-विधिः, रथोत्सवः, विद्वत्सभा, कविसम्माननञ्च वर्णितम् ।

यथा मेघप्रतिसन्देशे श्रीरामशास्त्रिणां पद्यरचनाचातुर्यं प्रमाणीकृतं तद्वत् अत्र कुम्भाभिषेकचम्पूग्रन्थे गद्यरचनाप्रावीण्यमपि संसाधितम् । तत्र शृङ्गगिरिं वर्णयन् आह–**राकेव सकलकलापपरिपूर्णद्विजराजमण्डलविराजितनदीपुलिनमिवपरमहंसपरि-**

शोभिता इति । अत्र श्लेषेण वर्णयन्ति सकलकलापरिपूरितमण्डलेन विराजितचन्द्र इव राजहंसशोभितनदी इव शृङ्गगिरिः शोभते इति । तथैव **सशालापि विशाला, सचित्रापि विचित्रा** इत्यादि विरोधाभासालङ्कारेण च स्वपाण्डित्यं प्रमाणयन्ति ।

तत्र शब्दालङ्कारेऽपि श्रीशास्त्रिणः नैपुण्यं हृदयावर्जकम् । तथा च महाराजागमनरीतिं इत्थं वर्णयन्ति । तथा च श्लोकः –

झगज्झगज्झगज्झगन्नादमेदुरोदरः
क्वथत्क्वथत्क्वथत्क्वथज्जलोज्ज्वलद्रवोज्ज्वलः ।
धगद्धगद्धगद्धगत्प्रदीपदीप्तिदिपितः
पुरः पुरः पुरः पथि प्रवीक्षितो रथः प्रभोः ॥
१–५२॥

अत्र रथसञ्चारे यो ध्वनिः उद्भवति तं ध्वनिं अनुकृत्य अयं श्लोकः विरचितः । श्लोकपठनेनैव रथागमनानुभवः जायते ।

पाठशालायां यल्लक्ष्यं श्रीरामशास्त्रिणां तल्लक्ष्यं पाकशालायां अपि आसीत् । कर्णाटकभक्ष्य विशेषान् नामतः चिरोटि, फेणी, मण्डिका,जिलेबि,लड्डुका, इति निर्दिशन् श्लोकमेकं व्यरचयन् । तथा च श्लोकः –

राशीकृताः क्वापि तदा चिरोट्यः
श्रेणीकृताः फेणकमण्डिकाद्याः ।
जिलेबिधीवर्धनलड्डुकादि
भक्ष्याणि लक्षाण्यपि लक्षितानि ॥ २–४॥

एवं पाकशालां समुद्रतया रूपयन्ति शास्त्रिणः । तत्र घृतमेव जलम् । पर्पटाः फेनपुञ्जाः । शाल्यन्नं वालुका । पाकाग्निरेव दावाग्निः । अमृतं च पायसम् । इत्थं सामान्या पाकशाला कविवर्णनवैभवेन असामान्या कृता । तथा च श्रूयते –

घृतोदका पर्पटफेनपुञ्जा
शाल्यन्नराशिच्छलसैकता च ।

पाकानलौर्वामृतपायसाड्ढा
महर्णवोऽभूदिव पाकशाला ॥२–५॥

श्रीरामशास्त्रिणः न केवलं शास्त्रशब्दकुशलाः। किन्तु शब्देनैव शब्दविशेषं पद्येनापि श्रावयन्ति । कुम्भाभिषेकचम्पूग्रन्थे उत्साहवर्धकस्य विनोदव्यापारस्य पटाक्षिस्फोटनस्य वैविध्यं वर्णयन्तः शास्त्रिणः तेषां काव्यचमत्कृतिं प्रदर्शयन्ति । तथा च श्रूयते –

विगलदनलसाराः केचिदाकाशबाणाः
सरभसममराणां पद्धतिं लङ्घयन्तः ।
सुर सुर सुर कृष्णक्ष्मापतेः कीर्तिलक्ष्मीं
पठ पठ पठ साध्वित्यानमन्ति ब्रुवन्तः ॥२–४०॥

अहो कवेः राजाभिमानम् ! अग्निं वमन्तः आकाशबाणाः गगनं लङ्घयन्तः कृष्णराजभूपतिं सुर सुर इति सम्बोधयन्ति । तस्य कीर्तिं पठितुं पठ पठ इत्यादिशन्ति च । निरर्थक सुर सुर पठ पठ इति शब्दमपि सार्थकयन्ति । किमसाध्यं क्रान्तदर्शिनाम्? नैतावत् तत्र पटाक्षिभेदं भूचक्राख्यं सशब्दं भ्रमन्तं इत्थं अनुकृत्य वर्णयन्ति । तथा च श्रूयते –

रौक्ष्यक्षीबतयायं
विनन्दन् क्रोधाद्विषं प्रतिभ्रमति ।
गर गर गर गर दूरे
चर चर चर चर चरेति वक्तीव ॥ २–४२ ॥

भूचक्रनामकं स्फोटकं गर गर चर चर इति शब्दं करोति । किन्तु अयं निरर्थकः शब्दः । कविः कल्पनया तस्य अर्थं कल्पयति । गर इति विषस्य सम्बोधनम् । चर इति दूरं गन्तुं आज्ञा । एवं साहजिकशब्दस्य शक्तत्वं सम्पाद्य रमन्ते श्रीरामशास्त्रिणः । शब्दस्य अभिधा, लक्षणा, व्यञ्जनाव्यापारैः अर्थबोधकत्वं सुप्रसिद्धम् । शास्त्रिणः शब्दस्य स्वरूपतोऽपि अर्थवत्वं प्रतिपादयन्ति । तथा च कुम्भाभिषेकमहोत्सवे

उद्भूततूर्यस्वनाः आदिशेषस्य नयनानि बधिरीकर्तुं प्रवृत्ता इति पातालं अपि आविशन् इति उत्प्रेक्षन्ते । यद्यपि अत्र अयोग्यता भासते । नयनानां बाधिर्यं कथं सञ्जाघटीति ? नयनदौर्बल्यं हि अन्धता स्यात् न बधिरता । बधिरता तु श्रोत्रेन्द्रियदौर्बल्यम् । अथापि नयनानां अन्धतां अविगणय्य तत्र बधिरतानिरूपणे शास्त्रिणः सूक्ष्मेक्षिका प्रभवति । यतः इमानि नयनानि शेषाहेः । अयं च चक्षुश्श्रवः । अतः तस्य श्रोत्रेन्द्रियं नयनेन्द्रियात् अतिरिक्तं निसर्गत एव दुर्लभम् । इमं नैसर्गिकं अंशं उद्बोधयितुं शास्त्रिभिः नयनानि बधिरीकृतानि । तथा च श्रूयते –

तावद्दुन्दुभिमर्दलानकरवप्रोद्भूततूर्यस्वनाः
स्वर्गङ्गातटपाटनोद्भटपटात्कारैः प्रभूतैर्वृताः ।
त्रस्यद्दिक्करिधीङ्कृतैः घनतराः पातालमप्याविशन्
शेषाहेर्नयनानि साधु बधिरीकर्तुं प्रवृत्ता इव
॥ १–७० ॥

एवं निरर्थकाः शब्दा अपि सप्रयोजनाः स्वरूपतः श्रवणमात्रेऽपि महत्कार्यं साधयन्ति इति शास्त्रिणः तत्र तत्र प्रतिपादयन्ति । एवं शास्त्रिणः गद्यपद्ययोः सङ्घटनायां सव्यसाचिनः । विद्युदावरकस्य बल्ब् इत्यस्य वर्णनन्तु अत्र उल्लेखमर्हति । तथा च श्रूयते –

'...वीथीषु वीथीष्वारक्षकराजपुरुषेष्विव पङ्क्तीभूय सन्नद्धेषु विद्युद्दीपस्तम्भेषु निरालम्बनभोमार्गप्रयाण-प्रच्युतेषु तदन्तरमवलोक्य तिमिरैः परिवृत्य स्प्रष्टुम-शक्ततया एकैकमपि कुक्कुटाण्डप्रमाणेषु वज्रपञ्जरेषु निपात्य समुद्बध्य दूरतः परिवार्यमाणतया पितरौ नः कदा समागच्छेतां कदा वा तदङ्कमारोहेमेति ऊर्ध्वमुखमालोकमानेषु प्रभाकरप्रभागर्भशिशुष्विव उन्नीतकाचसम्पुटान्तरुज्ज्वलितेषु विद्युद्दीपेषु विराजमानेषु ..... ।'

अत्र विद्युत्स्तम्भाः राजपुरुषायिताः । एते विद्युद्दीपाः प्रभा-प्रभाकरयोः दम्पत्योः अपत्यायिताः । एताः खलु श्रीरामशास्त्रिणः कल्पनालोकस्य चमत्कृतयः ।

एवं यमकेऽपि श्रीशास्त्रिणां चातुर्यं अत्याकर्षकम् । द्रुतविलम्बिते एतादृश यमकनियोजनं महाकविषु प्रसिद्धम् । श्रीरामशास्त्रिणः अपि यमकालङ्कारं न्ययोजयन् । कुम्भाभिषेकचम्पूप्रबन्धे एतत् श्रूयते -

उभयतो भयतो रहिताश्च ते
भुवि नता विनतासुतकेतनम् ।
सकलया कलया परिमण्डितं
भजनतो जनतोषकरं च तम् ॥१-२६॥

अस्मिन् ग्रन्थे शारदागुरुराजभक्तिप्रतिपादनपरत्वात् भावध्वनिः गम्यते । तदुक्तं काव्यप्रकाशे चतुर्थोल्लासे -'भावोरतिर्देवादिविषयो व्यभिचारी तथाञ्चितः' इति ।

अत्र ग्रन्थे छन्दसामपि नियोजने वैविध्यं दृश्यते । आहत्य ३५ छन्दसां प्रयोगः अत्र कृतः ।

संस्कृतकथासप्ततिः - इयं श्रीरामशास्त्रिणः लघुतमा कृतिः प्रमाणेन । अथापि प्रभावेन महत्तरा । कथा हि अमृतायते बालानाम् । कथां श्रावं श्रावं बालाः कथापथं अधिगच्छन्तः स्वतः कथा भविष्यन्ति । अतः संस्कृतसाहित्ये कथाबाहुल्यं वर्तते । कथाप्रभावं अवगम्य श्रीशास्त्रिणः अल्पाक्षरैः सारगर्भैः वचोभिः शिशुहिताय सप्ततिकथासङ्ग्रहं अत्र कृतौ अकुर्वन् । अत्र नीतिनवनीतं अपि समयोजयन् । आकरग्रन्थैः नीतिबोधकश्लोकान् समुच्चित्य स्वयं कथापाकं कृत्वा प्रज्ञापरिपाकानुकूलतया कथाः अरचयन् । अयं च ग्रन्थः आन्ध्रमातृकया मुद्रापितः । कुत्र कदा अयं मुद्रित इति विवरणं अत्र ग्रन्थे नैव उपलभ्यते । तत्र एतत् ग्रन्थलेखनोद्देशः शास्त्रिभिः

स्वयं एवं प्रतिपादितः :– '**संस्कृतवाक्यग्रन्थेषु कादम्बर्यादि उद्ग्रन्थसत्वेऽपि एवं नीतिबोधकस्य सुलभमार्गेण व्युत्पादकस्य च कस्यापि वाक्यग्रन्थस्य अभावात् अयमेव ग्रन्थः संस्कृतभाषयापि निरूपितश्चेत् गीर्वाण-भाषाव्युत्पित्सूनां बालानां बालिकानां च बहुशः पदपरिचयसुखबोधनमानसोल्लासनादिद्वारा स्वयं अत्यन्तोपयोगी स्यात् इत्यालोच्य अहं प्रौढतरान् प्रयोगान् विहाय सुलभमार्गेण इमं ग्रन्थं अलिखम्** ।'

तत्र कथासप्ततिग्रन्थप्रकारं प्रदर्शयितुं एषा प्रथमकथा अत्र अवलोकनाय निबध्यते । तत्र प्रथमतः अनुष्ठितं मङ्गलं यथा –

कृतनतजनताभरणं
श्रुतिततिसुदतीशिरोधृताभरणम् ।
शरणं भवभयतरणं
भजदघहरणं भजामि हरिचरणम् ॥ इति ।

१. पण्डितस्य तत्पुत्रयोश्च कथा

विद्या ददाति विनयं
विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति
धनाद्धर्मं ततस्सुखम् ॥

काश्यां कश्चित् विद्वान् अवर्तत । तस्य द्वौ पुत्रौ आस्ताम् । सः ज्येष्ठपुत्राय स्वीयं सर्वं धनमपि ददौ । कनिष्ठं सम्यक् विद्यानिपुणं अकरोत् । ज्यायान् केषुचित् दिनेषु सर्वस्वमपि व्ययित्वा दरिद्रो अभवत् । तस्मात् विद्यावानेव सुखी भवति ।

एवं शास्त्रिणः बालानां अपि सुलभावगाहं साहित्यं अरचयन् । अयं च मार्गः सम्प्रति संस्कृताभिवृद्धौ बहूपयुज्यते ।

प्रशस्तयः – मण्डिकल् श्रीरामशास्त्रिणां काव्यव्यवसायं अवगम्य विद्वत्प्रियाः तान् मनसा प्रशशंसुः । चामराजकल्याणचम्पूं, चामराजराज्याभिषेकचरितं, कृष्णराजाभ्युदयादि राजगृह-महोत्सवाभिवर्णनग्रन्थांश्च समालोक्य सन्तुष्टेन श्रीमता चामराजेन्द्रेण बहुधा सममन्यत । ततः भैमीपरिणयाख्यं नलचरित्रावबोधकं साङ्गं नाटकं अवलोक्य सन्तुष्टेन श्रीमता नाल्वडिकृष्णराजसार्वभौमेण **महाविद्वान्आस्थानकविरत्नमिति** सभायां नामोपाधिमनुगृह्य सरत्नकटकालङ्कारप्रदानपूर्वकं गृहारामाग्रहारप्रदानपूर्वकं च सम्माननं अकुर्वन् । ततः कुम्भाभिषेकचम्पूप्रबन्धेन प्रतोषितैः श्रीशृङ्गगिरि-जगद्गुरुचन्द्रशेखरभारतीगुरुवरैः **कविकुलालङ्कार** इति, श्रीमदुत्तरादिमठाधिपतिश्रीसत्यध्यानतीर्थगुरुवरैः **कविशिरोमणिः** इति गरलपुरीय श्रीराघवेन्द्रमठाधिपतिश्रिसुशीलेन्द्रयतिवरैः **सरसकविकुलकण्ठीरवः** इति, श्रीशिवगङ्गामठाधिपतिभिः श्रीसुब्रह्मण्याभिनवसच्चिदानन्दभारतीगुरुवरैः **कविकुलावतंसः** इति श्रीकाशीक्षेत्रस्थश्रीभारतधर्ममहामण्डलाध्यक्षैः **कविभूषणः** इति च नामोपाधिभिः सम्मानितो अभूत् एषः महानुभावः ।

अत्र मण्डिकल् श्रीरामशास्त्रिभिः विरचितेषु ग्रन्थेषु चामराज-कल्याणचम्पूः, चामराजराज्याभिषेकचरितम्, कृष्णराजाभ्युदयश्च न मुद्रितानि इति भाति । इतरे ग्रन्थास्तु मुद्रिताः । तत्र इमे शास्त्रिणः प्रभुसम्मितां, मित्रसम्मितां, कान्तासम्मितां च समानतया अधीत्य तत्सहायेन सर्वेषु प्रकारेषु ग्रन्थान् विरचयामासुः । तत्रापि बालानां उपकाराय, सम्प्रदायसंरक्षणाय च जागरूकाः आसन् । सम्प्रति भारते या स्थितिः दृश्यते तां अन्यथाकर्तुं शास्त्रिणां कृतयः मार्गदर्शिन्यः भवन्ति । इत्थं अशीतिर्वर्षाणि सारस्वतसेवां निर्वर्त्य १९२९ वत्सरे इहलोकयात्रां समापयामासुः मण्डिकल् श्रीरामशास्त्रिणः । अथापि काव्यकायेन ते चिरं जीवन्ति परान् उज्जीवयन्ति च ।

***

अस्मिन् ग्रन्थरचने इमे ग्रन्थाः आधारीभूताः ।

१. मेघप्रतिसन्देशस्य मोक्षकुण्डं लक्ष्मीपतिशर्मणां अनुभूत-महाराजसंस्कृतमहापाठशाला अध्यक्षाणां विज्ञापना । आर् श्यामशास्त्रीणां आङ्ग्लप्रस्तावना च ।

२. आर्यधर्मप्रकाशिका पीठिका मैसूरुशारदाविलासपाठशालाध्यक्षैः मण्डिल रामशास्त्रिभिः विरचिता ।

३. मण्डीकल् श्रीरामशास्त्रिकृतीनां सविमर्शाध्ययनम्- संशोधिका वि. ममता

मण्डिकल् रामशास्त्री



कर्णाटकराज्यस्य सुदीर्घे वाङ्मयेतिहासे अतिविशिष्टेन योगदानेन नक्षत्रायमाणाः अनेके महान्तः विद्यन्ते। इदं संस्कृतसाहित्येतिवृत्तं स्वातन्त्र्यपूर्वकालीनयुगस्य संस्कृतसाहित्येतिहासं समीचीनतया चित्रयति। किन्तु स्वातन्त्र्यसङ्ग्रामस्य कालघट्टे प्रवृत्तस्य संस्कृतसाहित्यसर्जनस्य इतिवृत्तरचना सम्यक् न जाता। कालक्रमेण इदम् अन्धकारयुगमिव सम्पद्येत कदाचित् । अस्मात् कारणात् १८५० तः १९५० पर्यन्तम् एकस्य शताब्दस्य कालखण्डे कर्णाटकस्य विविधेषु प्रदेशेषु निवसतां संस्कृतवाङ्मयस्य महत्तां वर्धयितुं कारणीभूतानां महतां योगदानविषये, तेषां जीवनगाथाविषये च शतं पुस्तकानि प्रकाशनीयानि इति अस्माकम् आशयः। अनया योजनया संस्कृतवाङ्मयस्य नवेतिहासः निर्मितः भविष्यति। एतेन, आधुनिकयुगेन सह गतशताब्दस्य सांस्कृतिकबन्धोऽपि दृढो भविष्यति इति मे विश्वासः।

अस्यां ग्रन्थमालायां विदुषा वि. गङ्गाधरभट्टमहोदयेन विदुषां श्री मण्डिकल् रामशास्त्रिमहोदयानां संस्कृतयोगदानमधिकृत्य विरचितं पुस्तकमिदं प्राकाश्यं नीयते। विद्वद्वरेण्यः श्री गङ्गाधरभट्टमहोदयः निरन्तरं संस्कृतशास्त्रसेवायां रतः न्यायसाहित्यादिशास्त्रेषु कृतभूरिश्रमः । अस्माकं प्रार्थनानुरोधेन ग्रन्थपुष्पिकामिमां अल्पे काले विरचय्य प्रदत्तवानिति तस्मै महाभागाय कार्तज्ञ्यं निवेदयामः ।

प्रो. मल्लेपुरं जि. वेङ्कटेशः, डि लिट्
कुलपतिः

Rs. 50/-

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः,चामराजपेटे,बेङ्गलूरु – ५६००१८